कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥ अथ तृतीय काण्डे द्वितीयः प्रश्नः॥

हरिः ओम्॥ यो वै पवमानानामन्वारोहान् विद्वान् यजतेऽनु पवमानाना रोहति न पवमानेभ्योऽव च्छिद्यते श्येनोऽसि गायत्रछन्दा अनु त्वाऽऽरभे स्वस्ति मा सं पारय सुपर्णोऽसि त्रिष्टुप्छन्दा अनु त्वाऽऽरभे स्वस्ति मा सं पारय सघाऽसि जगतीछन्दा अनु त्वाऽऽरभे स्वस्ति मा सं पारयेत्याहैते [१] वै पवमानानामन्वारोहास्तान् य एवं विद्वान् यजतेऽनु पवमानाना रोहति न पवमानेभ्योऽव च्छिद्यते यो वै पवमानस्य सन्ततिं वेद सर्वमायुरेति न पुराऽऽयुषः प्र मीयते पशुमान्भवति विन्दते प्रजां पवमानस्य ग्रहा गृह्यन्तेऽथ वा अस्यैतेऽगृहीता द्रोणकलश आधवनीयः पूतभृत्तान् यदगृहीत्वोपाकुर्यात्पवमानं वि [२] च्छिन्द्यात्तं विच्छिद्यमानमध्वर्योः प्राणोऽनु विच्छिद्येतोपयामगृहीतोऽसि प्रजापतये त्वेति द्रोणकलशमभि मृशेदिन्द्राय त्वेत्याधवनीयं विश्वेभ्यस्त्वा देवेभ्य इति पूतभृतं पवमानमेव तथ्सं तनोति सर्वमायुरेति न पुरायुषः प्र मीयते पशुमान्भवति विन्दतेप्रजाम्॥[३]

एते वि द्विचत्वारिग्ंशच्च॥3.2.1॥

त्रीणि वाव सवनान् यथ तृतीयग्ं सवनमवलुं पन्त्यनग्ंशु कुर्वन्त उपाग्ंशुग्ं हुत्वोपाग्ंशुपात्रेऽग्ंशुमवास्य तं तृतीयसवनेऽपिसृज्याऽभि षुणुयाद्यदाप्याययति तेनाऽग्ंशुमद्यदभिषुणोति तेनर्जीषि सर्वाण्येव तथ्सवनान्यग्ंशुमन्ति शुक्रवन्ति

समावद्वीर्याणि करोति द्वौ समुद्रौ वितताव जूर्यौ पर्यावर्तेते जठरेव पादाः। तयोः पश्यन्तो अति यन्त्यन् यमपश्यन्तः [४] सेतुनाऽति यन्त्यन्यम्॥ द्वे द्रधसी सतती वस्त एकः केशी विश्वा भुवनानि विद्वान्। तिरोधायैत्यसितं वसानः शुक्रमा दत्ते अनुहाय जार्यै॥ देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एतं महायज्ञमपश्यन्तमतन्वताऽग्निहोत्रं व्रतमकुर्वत तस्माद्द्विव्रतः स्याद्द्विर्ह्यग्निहोत्रं जुह्वति पौर्णमासं यज्ञमग्नीषोमीयं [५] पशुमकुर्वत दार्श्यं यज्ञमाग्नेयं पशुमकुर्वत वैश्वदेवं प्रातः सवनमकुर्वत वरुणप्रघासान्माध्यन्दिनग्ं सवनग्ं साकमेधान् पितृयज्ञं त्र्यम्बकाग् स्तृतीयसवनमकुर्वत तमेषामसुरा यज्ञमन्ववाजिगाग्ंसन्तं ऽनान्ववायन्तेऽब्रुवन्नध्वर्तव्या वा इमे देवा अभूवन्निति तदध्वरस्याध्वरत्वं ततो देवा अभवन्पराऽसुरा य एवं विद्वान्थ्सोमेन यजते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति॥ [६]

अपश्यन्तोऽग्नीषोमीयमात्मना परा त्रीणि च॥3.2.2॥

परिभूरग्निं परिभूरिन्द्रं परिभूर्विश्वान्देवान्परिभूर्मागं् सह ब्रह्मवर्चसेन स नः पवस्व शं गवे शं जनाय शमर्वते शगं् राजन्नोषधीभ्योऽच्छिन्नस्य ते रयिपते सुवीर्यस्य रायस्पोषस्य ददितारः स्याम। तस्य मे रास्व तस्य ते भक्षीय तस्य त इदमुन्मृजे॥ प्राणाय मे वर्चोदा वर्चसे पवस्वाऽपानाय व्यानाय वाचे [७] दक्षक्रतुभ्यां चक्षुभ्यां मे वर्चोदौ वर्चसे पवेथाग् श्रोत्रायाऽऽत्मनेऽङ्गेभ्य आयुषे वीर्याय विष्णोरिन्द्रस्य विश्वेषां देवानां जठरमसि वर्चोदा मे वर्चसे पवस्व कोऽसि को नाम कस्मै त्वा काय त्वा यं त्वा सोमेनाऽतीतृपं यं त्वा सोमेनाऽमीमदग्ं सुप्रजाः प्रजया भूयासग्ं सुवीरो

वीरैः सुवर्चा वर्चसा सुपोषः पोषैर्विश्वेभ्यो मे रूपेभ्यो वर्चोदा [८] वर्चसे पवस्व तस्य मे रास्व तस्य ते भक्षीय तस्य त इदमुन्मृजे॥ बुभूषन्नवेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति स एनं तृप्तो भूत्याऽभि पवते ब्रह्मवर्चसकामोऽवेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति स एनं तृप्तो ब्रह्मवर्चसेनाऽभि पवत आमयाव्य- [९] वेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति स एनं तृप्त आयुषाऽभि पवतेऽभिचरन्नवेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति स एनं तृप्तः प्राणापानाभ्यां वाचो दक्षक्रतुभ्यां चक्षुर्भ्याग् श्रोत्राभ्यामात्मनोऽङ्गेभ्य आयुषोऽन्तरेति ताजक्प्र धन्वति॥[१०]

वाचे रूपेभ्यो वर्चोदा आमयावी पञ्च चत्वारिग्ंशच्च॥3.2.3॥

स्फ्यः स्वस्तिर्विघनः स्वस्तिः परशुर्वेदिः परशुर्नः स्वस्तिः। यज्ञिया यज्ञकृतः स्थ ते माऽस्मिन् यज्ञ उप ह्वयध्वमुप मा द्यावापृथिवी ह्वयेतामुपाऽऽस्तावः कलशः सोमो अग्निरुप देवा उप यज्ञ उप मा होत्रा उपहवे ह्वयन्तां नमोऽग्नये मखघ्ने मखस्य मा यशोऽर्यादित्याहवनीयमुप तिष्ठते यज्ञो वै मखो [११] यज्ञं वाव स तदहन्तस्मा एव नमस्कृत्य सदः प्र सर्पत्यात्मनोऽनार्त्यै नमो रुद्राय मखघ्ने नमस्कृत्या मा पाहीत्याग्नीध्रं तस्मा एव नमस्कृत्य सदः प्र सर्पत्यात्मनोऽनार्त्यै नम इन्द्राय मखघ्न इन्द्रियं मे वीर्यं मा निर्वधीरिति होत्रीयमाशिषमेवैतामा शास्त इन्द्रियस्य वीर्यस्याऽनिर्घाताय या वै [१२] देवताः सदस्यार्तिमार्पयन्ति यस्ता विद्वान्प्रसर्पति न सदस्यार्तिमार्छति नमोऽग्नये मखघ्न इत्याहैता वै देवताः सदस्यार्तिमाऽर्पयन्ति ता य एवं विद्वान्प्रसर्पति न सदस्यार्तिमार्छति दृढे स्थः शिथिरे समीची माऽग्ंहसस्पातग्ं

सूर्यो मा देवो दिव्यादग्ंहसस्पातु वायुरन्तरिक्षा– [१३] दग्निः पृथिव्या यमः पितृभ्यः सरस्वती मनुष्येभ्यो देवी द्वारौ मा मा सं ताप्तं नमः सदसे नमः सदसस्पतये नमः सखीनां पुरोगाणाञ्चक्षुषे नमो दिवे नमः पृथिव्या अहे दैधिषव्योदतस्तिष्ठाऽन्यस्य सदने सीद योऽस्मत्पाकतर उन्निवत उदुद्वतश्च गेषं पातं मा द्यावापृथिवी अद्याऽह्नः सदो वै प्रसर्पन्तं [१४] पितरोऽनु प्र सर्पन्ति त एनमीश्वरा हिग्ंसितोः सदः प्रसृप्य दक्षिणार्धं परेक्षेताऽऽगन्त पितरः पितृमानहं युष्माभिर्भूयासग्ं सुप्रजसो मया यूयं भूयास्तेति तेभ्य एव नमस्कृत्य सदः प्र सर्पत्यात्मनोऽनार्त्यै॥[१५]

मखो वा अन्तरिक्षात्प्रसर्पन्तं त्रयस्त्रिग्ंशच्च॥3.2.4॥

भक्षेहि मा ऽऽविश दीर्घायुत्वाय शन्तनुत्वाय रायस्पोषाय वर्चसे सुप्रजास्त्वायेहि वसो पुरोवसो प्रियो मे हृदोऽस्यश्विनोस्त्वा बाहुभ्याग्ं सघ्यासं नृचक्षसं त्वा देव सोम सुचक्षा अव ख्येषं मन्द्राऽभिभूतिः केतुर्यज्ञानां वाग्जुषाणा सोमस्य तृप्यतु मन्द्रा स्ववर्वाच्यदितिरनाहतशीर्ष्णी वाग्जुषाणा सोमस्य तृप्यत्वेहि विश्वचर्षणे [१६] शं भूर्मयोभूः स्वस्ति मा हरिवर्ण प्र चर ऋत्वे दक्षाय रायस्पोषाय सुवीरतायै मा मा राजन्वि बीभिषो मा मे हार्दि त्विषा वधीः। वृषणे शुष्मायायुषे वर्चसे॥ वसुमद्गणस्य सोम देव ते मतिविदः प्रातः सवनस्य गायत्रछन्द स इन्द्रपीतस्य नराशग्ंसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि रुद्रवद्गणस्य सोम देव ते मतिविदो माध्यन्दिनस्य सवनस्य त्रिष्टुप्छन्दस इन्द्रपीतस्य नराशग्ंसपीतस्य [१७] पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयाम्यादित्यवद्गणस्य सोम देव ते मतिविदस्तृतीयस्य सवनस्य जगतीछन्दस इन्द्रपीतस्य नराशग्ंसपीतस्य पितृपीतस्य मधुमत

उपहूतस्योपहूतो भक्षयामि॥ आ प्यायस्व समेतु ते विश्वतः सोम वृष्णियम्। भवा वाजस्य संगथे॥ हिन्व मे गात्रा हरिवो गणान्मे मा वि तीतृषः। शिवो मे सप्तर्षीनुप तिष्ठस्व मा मेऽवाङ्नाभिमति [१८] गाः॥ अपाम सोममममृता अभूमाऽदर्श्म ज्योतिरविदाम देवान्। किमस्मान्कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य॥ यन्म आत्मनो मिन्दाऽभूदग्निस्तत्पुनराऽहार्जातवेदा विचर्षणिः। पुनरग्निश्चक्षुरदात्पुनरिन्द्रो बृहस्पतिः। पुनर्मे अश्विना युवं चक्षुरा धत्तमक्ष्योः॥ इष्टयजुषस्ते देव सोम स्तुतस्तोमस्य [१९] शस्तोक्थस्य हरिवत इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि॥ आपूर्याः स्थाऽऽ मा पूरयत प्रजया च धनेन च॥ एतत्ते तत ये च त्वामन्वेतत्ते पितामह प्रपितामह ये च त्वामन्वत्र पितरो यथाभागं मन्दध्वं नमो वः पितरो रसाय नमो वः पितरः [२०] शुष्माय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो मन्यवे नमो वः पितरो घोराय पितरो नमो वो य एतस्मिँल्लोके स्थ युष्माग्स्तेऽनु येऽस्मिँल्लोके मां तेऽनु य एतस्मिँल्लोके स्थ यूयं तेषां वसिष्ठा भूयास्त येऽस्मिँल्लोकेऽहं तेषां वसिष्ठो भूयासं प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव [२१] यत्कामास्ते जुहुमस्तन्नो अस्तु वयग्ग् स्याम पतयो रयीणाम्॥ देवकृतस्यैनसोऽवयजनमसि मनुष्यकृतस्यैनसोऽवयजनमसि पितृकृतस्यैनसोऽवयजनमस्यप्सु धौतस्य सोम देव ते नृभिः सुतस्येष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्य यो भक्षो अश्वसनिर्यो गोसनिस्तस्य ते पितृभिर्भक्षंकृतस्योपहूतस्योपहूतो भक्षयामि॥[२२]

विश्वचर्षणे त्रिष्टुप्छन्धस इन्द्रपीतस्य नराशग्ंसपीतस्याति स्तुतस्तोमस्य जीवाय नमो वः पितरो बभूव चतुश्चत्वारिग्ंशच्च॥3.2.5॥

महीनां पयोऽसि विश्वेषां देवानां तनूरृध्यासमद्य पृषतीनां ग्रहं पृषतीनां ग्रहोऽसि विष्णोर्हृदयमस्येकमिष विष्णुस्त्वाऽनु वि चक्रमे भूतिर्दध्ना घृतेन वर्धतां तस्य मेष्टस्य वीतस्य द्रविणमा गम्याज्ज्योतिरसि वैश्वानरं पृश्नियै दुग्धं यावती द्यावापृथिवी महित्वा यावच्च सप्त सिन्धवो वितस्थुः। तावन्तमिन्द्र ते [२३] ग्रहग्ं सहोर्जा गृह्णाम्यस्तृतम्॥ यत्कृष्णशकुनः पृषदाज्यमवमृशेच्छूद्रा अस्य प्रमायुकाः स्युर्यच्छ्वाऽव मृशेच्चतुष्पादोऽस्य पशवः प्रमायुकाः स्युर्यत् स्कन्देद्यजमानः प्रमायुकः स्यात्पशवो वै पृषदाज्यं पशवो वा एतस्य स्कन्दन्ति यस्य पृषदाज्यग्ग् स्कन्दति यत्पृषदाज्यं पुनर्गृह्णाति पशूनेवाऽस्मै पुनर्गृह्णाति प्राणो वै पृषदाज्यं प्राणो वा [२४] एतस्य स्कन्दति यस्य पृषदाज्यग्ग् स्कन्दति यत्पृषदाज्यं पुनर्गृह्णाति प्राणमेवाऽस्मै पुनर्गृह्णाति हिरण्यमवधाय गृह्णात्यमृतं वै हिरण्यं प्राणः पृषदाज्यममृतमेवाऽस्य प्राणे दधाति शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यश्वमव घ्रापयति प्राजापत्यो वा अश्वः प्राजापत्यः प्राणः स्वादेवास्मै योनेः प्राणं निर्मिमीते वि वा एतस्य यज्ञश्छिद्यते यस्य पृषदाज्यग्ग् स्कन्दति वैष्णव्यर्चा पुनर्गृह्णाति यज्ञो वै विष्णुर्यज्ञेनैव यज्ञग्ं सं तनोति॥[२५]

ते पृषदाज्यं प्राणो वै योनेः प्राणं द्वाविग्ंशतिश्च॥3.2.6॥

देव सवितरेतत्ते प्राऽह तत्प्र च सुव प्र च यज बृहस्पतिर्ब्रह्माऽऽयुष्मत्या ऋचो मा गात तनूपाथ्साम्नः सत्या व आशिषः सन्तु सत्या आकूतय ऋतं च सत्यं च वदत स्तुत देवस्य सवितुः प्रसवे स्तुतस्य स्तुतमस्यूर्जं मह्यग्ग् स्तुतं दुहामा मा स्तुतस्य

स्तुतं गम्याच्छस्त्रस्य शस्त्र- [१६] मस्यूर्जं मह्यग्ं शस्त्रं दुहामा मा शस्त्रस्य शस्त्रं गम्यादिन्द्रियावन्तो वनामहे धुक्षीमहि प्रजामिषम्॥ सा मे सत्याऽऽशीर्देवेषु भूयाद्ब्रह्मवर्चसं माऽऽ गम्यात्॥ यज्ञो बभूव स आ बभूव स प्र जज्ञे स वावृधे। स देवानामधिपतिर्बभूव सो अस्माग्ं अधिपतीन्करोतु वयग्ग् स्याम पतयो रयीणाम्॥ यज्ञो वा वै [१७] यज्ञपतिं दुहे यज्ञपतिर्वा यज्ञं दुहे स यः स्तुतशस्त्रयोर्दोहमविद्वान् यजते तं यज्ञो दुहे स इष्ट्वा पापीयान्भवति य एनयोर्दोहं विद्वान् यजते स यज्ञं दुहे स इष्ट्वा वसीयान्भवति स्तुतस्य स्तुतमस्यूर्जं मह्यग्ग् स्तुतन्दुहामा मा स्तुतस्य स्तुतङ्गम्याच्छस्त्रस्य शस्त्रमस्यूर्जं मह्यग्ं शस्त्रं दुहामा मा शस्त्रस्य शस्त्रङ्गम्यादित्याहैष वै स्तुतशस्त्रयोर्दोहस्तं य एवं विद्वान् यजते दुह एव यज्ञमिष्ट्वा वसीयान्भवति॥[१८]

शस्त्रंवै शस्त्रं दुहां द्वाविग्ंशतिश्च॥3.2.7॥

श्येनाय पत्वने स्वाहा वट्स्वयमभिगूर्ताय नमो विष्टं भाय धर्मणे स्वाहा वट्स्वयमभिगूर्ताय नमः परिधये जनप्रथनाय स्वाहा वट्स्वयमभिगूर्ताय नम ऊर्जे होत्राणाग् स्वाहा वट्स्वयमभिगूर्ताय नमः पयसे होत्राणाग् स्वाहा वट्स्वयमभिगूर्ताय नमः प्रजापतये मनवे स्वाहा वट्स्वयमभिगूर्ताय नम ऋतमृतपाः सुवर्वाट्स्वाहा वट्स्वयमभिगूर्ताय नमस्तृं पन्ताग्ं होत्रा मधोर्घृतस्य यज्ञपतिमृषय एनसा- [१९] ऽऽहुः। प्रजा निर्भक्ता अनुतप्यमाना मधव्यौ स्तोकावप तौ रराध। सं नस्ताभ्याग्ं सृजतु विश्वकर्मा घोरा ऋषयो नमो अस्त्वेभ्यः। चक्षुष एषां मनसश्च सन्धौ बृहस्पतये महि षद्द्युमन्नमः। नमो विश्वकर्मणे स उ

पात्वस्माननन्यान्थ्सोमपान् मन्यमानः। प्राणस्य विद्वान्थ्समरे न धीर एनश्चकृवान्महि बद्ध एषाम्॥ तं विश्वकर्म– [३०] न्प्र मुञ्चा स्वस्तये ये भक्षयन्तो न वसून्यानृहुः। यानग्नयोऽन्वतप्यन्त धिष्णिया इयं तेषामवया दुरिष्ट्यै स्विष्टिं नस्तां कृणोतु विश्वकर्मा॥ नमः पितृभ्यो अभि ये नो अख्यन् यज्ञकृतो यज्ञकामाः सुदेवा अकामा वोदक्षिणां न नीनिम मा नस्तस्मादेनसः पापयिष्ट। यावन्तो वै सदस्यास्ते सर्वे दक्षिण्यास्तेभ्यो यो दक्षिणां न [३१] नयेदैभ्यो वृश्च्येत यद्वैश्वकर्मणानि जुहोति सदस्यानेव तत्प्रीणात्यस्मे देवासो वपुषे चिकिथ्सत यमाशिरा दम्पती वाममश्नुतः। पुमान्पुत्रो जायते विन्दते वस्वथ विश्वे अरपा एधते गृहः॥ आशीर्दाया दम्पती वाममश्नुतामरिष्टो रायः सचताग्ं समोकसा। य आऽसिचथ्संदुग्धं कुम्भ्या सहेष्टेन यामन्नमतिं जहातु सः॥ सर्पिर्ग्रीवी [३२] पीवर्यस्य जाया पीवानः पुत्रा अकृशासो अस्य। सहजानिर्यः सुमखस्यमान इन्द्रायाऽऽशिरग्ं सह कुम्भ्याऽदात्॥ आशीर्म ऊर्जमुत सुप्रजास्त्वमिषं दधातु द्रविणग्ं सवर्चसम्। सञ्जयन् क्षेत्राणि सहसाऽहमिन्द्र कृण्वानो अन्याग्ं अधरान्थ्सपत्नान्॥ भूतमसि भूते मा धा मुखमसि मुखं भूयासं द्यावापृथिवीभ्यां त्वा परिगृह्णामि विश्वे त्वा देवा वैश्वानराः [३३] प्र च्यावयन्तु दिवि देवान्दृग्ंहान्तरिक्षेवयाग्ंसि पृथिव्यां पार्थिवान्ध्रुवं ध्रुवेण हविषाऽव सोमं नयामसि। यथा नः सर्वमिज्जगदयक्ष्मग्ं सुमना असत्॥ यथा न इन्द्र इद्दिशः केवलीः सर्वाः समनसः करत्। यथा नः सर्वा इद्दिशोऽस्माकं केवलीरसन्न्॥[३४]

एनसा विश्वकर्मन् यो दक्षिणां नसर्पिर्ग्रीवी वैश्वानराश्चत्वारिग्ंशच्च॥3.2.8॥

यद्वै होताऽध्वर्युमभ्याह्वयते वज्रमेनमभि प्र वर्तयत्युक्थशा इत्याह प्रातः सवनं

प्रतिगीर्य त्रीण्येतान्यक्षराणि त्रिपदा गायत्री गायत्रं प्रातः सवनं गायत्रियैव प्रातः सवने वज्रमन्तर्धत्त उक्थं वाचीत्याह माध्यन्दिनग्ं सवनं प्रतिगीर्य चत्वार्येतान्यक्षराणि चतुष्पदा त्रिष्टुप्त्रैष्टुभं माध्यन्दिनग्ं सवनं त्रिष्टुभैव माध्यन्दिने सवने वज्रमन्तर्धत्त [३५] उक्थं वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य सप्तैतान्यक्षराणि सप्तपदा शक्वरी शाक्वरो वज्रो वज्रेणैव तृतीयसवने वज्रमन्तर्धत्ते ब्रह्मवादिनो वदन्ति स त्वा अध्वर्युः स्याद्यो यथासवनं प्रतिगरे छन्दाग्ंसि सं पादयेत्तेजः प्रातः सवन आत्मन्दधीतेन्द्रियं माध्यन्दिने सवने पशूग्स्तृतीयसवन इत्युक्थशा इत्याह प्रातः सवनं प्रतिगीर्य त्रीण्येतान्यक्षराणि [३६] त्रिपदा गायत्री गायत्रं प्रातः सवनं प्रातः सवन एव प्रतिगरे छन्दाग्ंसि सं पादयत्यथो तेजो वै गायत्री तेजः प्रातः सवनं तेज एव प्रातः सवन आत्मन्धत्त उक्थं वाचीत्याह माध्यन्दिनग्ं सवनं प्रतिगीर्य चत्वार्येतान्यक्षराणि चतुष्पदा त्रिष्टुप्त्रैष्टुभं माध्यन्दिनग्ं सवनं माध्यन्दिन एव सवने प्रतिगरे छन्दाग्ंसि सं पादयत्यथो इन्द्रियं वै त्रिष्टुगिन्द्रियं माध्यन्दिनग्ं सवन- [३७] मिन्द्रियमेव माध्यन्दिने सवन आत्मन्धत्त उक्थं वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य सप्तैतान्यक्षराणि सप्तपदा शक्वरी शाक्वराः पशवो जागतं तृतीयसवनं तृतीयसवन एव प्रतिगरे छन्दाग्ंसि सं पादयत्यथो पशवो वै जगती पशवस्तृतीयसवनं पशूनेव तृतीयसवन आत्मन्धत्ते यद्वै होताध्वर्युमभ्याह्वयत आव्यमस्मिन्दधाति तद्यन्ना- [३८] ऽपहनीत पुराऽस्य संवथ्सराद्गृह आ वेवीरङ्छोग्ंसा मोद इवेति प्रत्याह्वयते तेनैव तदप हते यथा वा आयतां प्रतीक्षत एवमध्वर्युः प्रतिगरं प्रतीक्षते यदभिप्रतिगृणीयाद्यथायतया समृच्छते तादृगेव तद्यदर्धर्चाल्लुप्येत यथा धावभ्यो हीयते तादृगेव तत्प्रबाहुग्वा

ऋत्विजामुद्गीथा उद्गीथ एवोद्गातृणा– [३९] मृचः प्रणव उक्थशग्ंसिनां प्रतिगरोऽध्वर्यूणां य एवं विद्वान्प्रतिगृणात्यन्नाद एव भवत्याऽस्य प्रजायां वाजी जायत इयं वै होताऽसावध्वर्युर्यदासीनः शग्ंसत्यस्या एव तद्धोता नैत्यास्त इव हीयमथो इमामेव तेन यजमानो दुहे यत्तिष्ठन्प्रतिर्गृणात्यमुष्या एव तदध्वर्युर्नैति [४०] तिष्ठतीव ह्यसावथो अमूमेव तेन यजमानो दुहे यदासीनः शग्ंसति तस्मादितः प्रदानं देवा उप जीवन्ति यत्तिष्ठन्प्रतिगृणाति तस्मादमुतः प्रदानं मनुष्या उप जीवन्ति यत्प्राङासीनः शग्ंसति प्रत्यङ्तिष्ठन्प्रतिगृणाति तस्मात्प्राचीनग्ं रेतो धीयते प्रतीचीः प्रजा जायन्ते यद्वै होताऽध्वर्युमभ्याह्वयते वज्रमेनमभि प्र वर्तयति पराङा वर्तते वज्रमेवतन्नि करोति॥[४१]

*सवने वज्रमन्तर्धत्ते त्रीण्यैतान्यक्षराणीन्द्रियं माध्यं दिनग्ं सवनं नोद्गातृणामध्वर्युर्नैति वर्तयत्यष्टौ च॥**3.2.9***॥

उपयामगृहीतोऽसि वाक्षसदसि वाक्पाभ्यां त्वा ऋतुपाभ्यामस्य यज्ञस्य ध्रुवस्याऽध्यक्षाभ्यां गृह्णाम्युपयामगृहीतो ऽस्यृतसदसि चक्षुष्पाभ्यां त्वा ऋतुपाभ्यामस्य यज्ञस्य ध्रुवस्याऽध्यक्षाभ्यां गृह्णाम्युपयामगृहीतोऽसि श्रुतसदसि श्रोत्रपाभ्यां त्वा ऋतुपाभ्यामस्य यज्ञस्य ध्रुवस्याऽध्यक्षाभ्यां गृह्णामि देवेभ्यस्त्वा विश्वदेवेभ्यस्त्वा विश्वेभ्यस्त्वा देवेभ्यो विष्णवुरुक्रमैष ते सोमस्तग्ं रक्षस्व [४२] तं ते दुश्चक्षा माऽव ख्यन्मयि वसुः पुरोवसुर्वाक्पा वाचं मे पाहि मयि वसुर्विदद्वसुश्चक्षुष्पाश्चक्षुर्मे पाहि मयि वसुः संयद्वसुः श्रोत्रपाः श्रोत्रं मे पाहि भूरसि श्रेष्ठो रश्मीनां प्राणपाः प्राणं मे पाहि धूरसि श्रेष्ठो रश्मीनामपानपा अपानं मे पाहि यो न इन्द्रवायू मित्रावरुणावश्विनावभिदासति भ्रातृव्य उत्पिपीते शुभस्पती इदमहं

तमधरं पादयामि यथेन्द्राऽहमुत्तमश्चेतयानि॥[४३]

रक्षस्व भ्रातृव्यस्त्रयोदश च॥3.2.10॥

प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः। यस्य त्वग्ं सख्यमाविथ॥ प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत्। विपां ज्योतींग्ंषि बिभ्रते न वेधसे॥ अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः। तिस्र उ ते तनुवो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन्न्॥ सं वां कर्मणा समिषा [४४] हिनोमीन्द्राविष्णू अपसस्पारे अस्य। जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता॥ उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः। इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम्॥ त्रीण्यायूग्ंषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने। ताभिर्देवानामवो यक्षि विद्वानथा [४५] भव यजमानाय शं योः॥ अग्निस्त्रीणि त्रिधातून् या क्षेति विदथा कविः। स त्रीग्ंरेकादशाग्ं इह। यक्षच्च पिप्रयच्च नो विप्रो दूतः परिष्कृतः। नभन्तामन्यके समे॥ इन्द्राविष्णू दृग्ंहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टम्। शतं वर्चिनः सहस्रं च साकग्ं हथो अप्रत्यसुरस्य वीरान्॥ उत माता महिषमन्ववेनदमी त्वा जहति पुत्र देवाः। अथाऽब्रवीद्वृत्रमिन्द्रो हनिष्यन्थ्सखे विष्णो वितरं वि क्रमस्व॥[४६]

इषाऽथ त्वा त्रयोदश च॥3.2.11॥

यो वै पवमानानां त्रीणि परिभूस्पय्यस्वस्तिर्भक्षेहि महीनां पयोऽसि देव सवितरेतत्ते श्येनाय यद्वै होतोपयामगृहीतोऽसि वाक्षसदसि प्र सो अग्न एकादश॥11॥

योवै पय्यस्वस्ति स्वधायैनमः प्रमुञ्च तिष्ठतीवषट्चत्वारिग्ंशत्॥४६॥

योवै पवमानानां वि क्रमस्व॥

॥ हरिः ओम्॥

॥ श्री कृष्णार्पणमस्तु॥

॥ इति तृतीयकाण्डे द्वितीयः प्रश्नः॥